# आदर्श प्रश्नपत्र/ Model Que. Paper : I/23-24/ संस्कृत /
# वेदविभूषण प्रथम-वर्ष / Vedavibhushan First Year/
# कक्षा 11वीं / उत्तर मध्यमा - I / Class 11th / Uttar Madhyama - I
# वर्ष / Year 2023-24
## विषयः- संस्कृतम्

समयः- 3 होराः पूर्णाङ्काः- 100

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 15 पृष्ठानि तथा च 14 प्रमुखाः प्रश्नाः सन्ति।
2. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयं किमपि उत्तरं न लेखनीयम्।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति-

| | | | |
|---|---|---|---|
| क. | खण्डः | अपठितावबोधनम् | 20 अङ्काः |
| ख. | खण्डः | रचनात्मककार्यम् | 15 अङ्काः |
| ग. | खण्डः | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| घ. | खण्डः | पठितावबोधनम् | 40 अङ्काः |

4. सर्वेषां प्रश्नानामुत्तराणि संस्कृतेन लेखनीयानि।
5. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

### क खण्डः
### (अपठितावबोधनम्- 20 अङ्काः)

1. **अधोलिखितम् अपठितगद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि पूर्णवाक्येन लिखत-** 2 × 5 = 10

मन्त्राणां समूहस्संहिता इत्युच्यते । संहिताशब्दस्य पारिभाषिकोऽर्थः "परः संन्निकर्षः संहिता" (अष्टाध्यायी) इति । वर्णानामतिशयितस्सन्निधिस्संहितासंज्ञः स्यादिति अस्य सूत्रस्यार्थः । वस्तुतो वेदरक्षणार्थमष्टौ विकृतयः प्रोक्ताः । यथा —

**जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।**
**अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥**

एतान् विकृतिपाठान् अतिरिच्य त्रयोऽपरेऽपि पाठा विद्यन्ते ते प्रकृतिपाठाः उच्यते। यथा - 1) संहितापाठः 2) पदपाठ: 3) क्रमपाठश्चेति । एतेषु पाठेषु प्रायष्डेव मुख्या आसन् । यथा - संहितापाठ:, पदपाठः, क्रमपाठः, जटापाठः, शिखापाठः, घनपाठश्चेति । यत्र मन्त्राणां पदानि विभज्य

पठ्यन्ते, सः पादपाठः; यत्र साक्षात् पदच्छेदं विना मन्त्रोच्चारणं क्रियते, सः संहितापाठ इति कथ्यते । एवमत्र संहिता नाम मूलमन्त्र इति वक्तुं शक्यते । सम्पूर्णे वैदिकवाङ्मये चतस्रः संहिताः भवन्ति । तत्र ऋग्वेदस्य विषयः "शस्त्रम्" । शस्त्रं नाम "अप्रगीतमन्त्रसाध्या स्तुतिः" इति । "इज्या" (यज्ञकर्म) यजुषो विषयः । "स्तुतिः" सामवेदस्य विषयः । "प्रायश्चित्तं" चाथर्ववेदस्य विषयः । केषुचिद् ब्राह्मणग्रन्थेषु ऋग्वेदो "भूलोकः", यजुर्वेदः "अन्तरिक्षम्", सामवेदश्च "द्युलोक" इति कथ्यते । ऋग्वेदस्य सृष्टिः अग्नेः, यजुर्वेदस्य वायोः, सामवेदस्य सूर्याच्च सञ्जातेति केचन अभिप्रयन्ति । यजुर्वेदाधारेण ऋग्वेदो वाक्तत्त्वस्य, यजुर्वेदो मनस्तत्त्वस्य, सामवेदः प्राणतत्त्वस्य च सङ्ग्राहको ग्रन्थो भवति ।

अ. अस्य अनुच्छेदस्य कृते सार्थकं शीर्षकं लिखत।

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

आ. मन्त्राणां समूहः किमुच्यते ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

इ. वेदरक्षणार्थं काः काः विकृतयः पठिताः ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

ई. किं नाम पदपाठः ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

उ. ऋग्वेदस्य विषयः कः ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

**2. अधोलिखितम् अपठितगद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि पूर्णवाक्येन लिखत-** 2 × 5 = 10

तुलसी केन वा न जायेत ? भारते प्रतिगृहं सा भवेत् एव । प्रतिदिनं सा पूज्यते एव । केषुचित् विशिष्टेषु प्रसङ्गेषु तस्याः विशेषपूजा अपि भवति । बहूनां रोगाणां परिसरमालिन्यस्य च निवारणेऽपि सा उपकरोति इति वदन्ति वैज्ञानिकाः । तस्याः एतत् वैशिष्ट्यम् एव एषु दिनेषु ताजभवनस्य संरक्षकाणाम् अवधानम् अपि आकृष्टवत् अस्ति । परिसरमालिन्यकारणतः ताजभवनस्य सौन्दर्यं यत् विनश्यत् अस्ति तस्य निवारणाय तद्भवनसंरक्षकैः चिन्तितं यत् तुलस्याः साहाय्यं स्वीकरणीयम् इति । अतः इदानीं ताजभवनपरिसरे सहस्रशः तुलसीसस्यानि आरोप्यमाणानि सन्ति । तुलसी आधिक्येन आम्लजनकम् उत्पाद्य हानिकराणाम् अनिलानां प्रभावं न्यूनीकरोति इति तु प्रमाणसिद्धं सत्यम् ।

अ. भारते प्रतिगृहं का भवेत् ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

आ. तुलसी आधिक्येन किम् उत्पादयति ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

इ. केन कारणेन ताजभवनस्य सौन्दर्यं विनश्यत् अस्ति ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

ई. तुलसी किमर्थम् उपकरोति इति वदन्ति वैज्ञानिकाः ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

उ. कस्य विशेषपूजा भवति ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

## ख खण्डः

## (रचनात्मककार्यम्- 15 अङ्काः)

3. वेदानां महत्वम् इति विषयमवलम्ब्य दशवाक्यपरिमितं निबन्धं लिखत। 05

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------


------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

4. प्रदत्तं चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत। 05




-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

5. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। $1 \times 5 = 05$

अ. मैं गणित तथा विज्ञान पढ़ता हुँ। I teach Mathematics and Science.

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

आ. माता पुत्र को उपदेश देती है। Mother preaches Son.

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

इ. विद्या विनम्रता प्रदान करती है। Learning teacher humility.

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

ई. जननी और जन्मभूमि स्वर्ग से महान है। Mother and Motherland are greater them heaven.

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

उ. बालक को मोदक प्रिय है। Child lives sweet bolls.

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

## ग खण्डः

## (अनुप्रयुक्तव्याकरणम्- 25 अङ्काः)

6. **अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं निर्दिशत-** 1 × 5 = 05

| | | विग्रहः | समासनाम |
|---|---|---|---|
| अ. | राजदर्शनम् | ..................................... | ......................................... |
| आ. | तपोधनम् | ..................................... | ......................................... |
| इ. | वत्सराजः | ..................................... | ......................................... |
| ई. | प्रतिदिनम् | ..................................... | ......................................... |
| उ. | निर्गुणम् | ..................................... | ......................................... |

7. **अधोलिखितपदानां लिङ्ग-विभक्ति-वचनानि लिखत-** 1 × 5 = 05

| | | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| अ. | मातुः | ........................... | ............................ | ................................ |
| आ. | मयि | ........................... | ............................ | ................................ |
| इ. | चन्द्रमसौ | ........................... | ............................ | ................................ |

ई. नेत्रैः .......................... .......................... ..........................

उ. भृत्याम् .......................... .......................... ..........................

8. **अधोलिखितपदानां प्रकृतिप्रत्ययौ विभजत -** 1 × 5 = 05

| | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| अ. | उक्त्वा | .............................. | .................................... |
| आ. | दत्तम् | .............................. | .................................... |
| इ. | नेनीयते | .............................. | .................................... |
| ई. | अर्चनीया | .............................. | .................................... |
| उ. | वक्तुम् | .............................. | .................................... |

9. **अधोलिखितानां शब्दानां सन्धिनिर्देशपूर्वकं सन्धिविच्छेदं कुरुत -** 1 × 5 = 05

| | | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|---|
| अ. | शिवास्ते | ..............+............. | ............................. |
| आ. | कुलस्याधयः | ..............+............. | ............................. |
| इ. | ततोऽसौ | ..............+............. | ............................. |
| ई. | वंशोच्छेदः | ..............+............. | ............................. |
| उ. | वित्तं च | ..............+............. | ............................. |

10. **रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -** 1 × 5 = 05

अ. मनः जाग्रतः <u>दूरङ्गमम</u>ुदैति ।

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

आ. मनसः ऋते न किञ्चन <u>कर्म</u> क्रियते ।

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

इ. मनसि प्रज्ञानां सर्वं <u>ज्ञानम्</u> ओतम् ।

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

ई. नाटकेषु रम्यं <u>शाकुन्तलम्</u> ।

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

उ. शकुन्तला <u>कण्वस्य</u> पालितपुत्री आसीत् ।

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

**घ खण्डः**

**(पठितावबोधनम्- 40 अङ्काः)**

11. **अधो दत्तान् मन्त्रान् पठित्वा प्रश्नानां समाधानानि लिखन्तु -** 1 × 5 = 05

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ १ ॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम॥ २ ॥
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ ३ ॥
यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥ ४ ॥

अ. अग्रे कः समवर्तत ?

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

आ. ‘य आत्मदा बलदा यस्य’ इत्यत्र य इति पदस्य अर्थ कः ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

इ. इमाः प्रदिशः प्रजापतेः किम् ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

ई. देवानाम् असुः कः समवर्तत ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

उ. सः प्रजापतिः एकः अद्वितीयः अन्यत् किं भवति ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

12. **अधोलिखितेषु प्रश्नेषु केषाञ्चित् पञ्चानाम् उत्तरं 25-30 शब्दैः उत्तरत-** $2 \times 5 = 10$

अ. विष्णोः शिवस्य च पूजार्थं कियद् द्रव्यं विनियुयोज?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

आ. मनसि ऋचः साम यजूंषि कथमिव प्रतिष्ठिताः ?

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------

इ. शकुन्तलायाः सख्योः नाम किम् ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

ई. धाराराज्ये किं नाम राजा प्रजाः पर्यपालयत् ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

उ. भ्राता दायभागनिमित्तेन किं न कुर्यात् ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

ऊ. चन्द्रापीडस्य आचार्यस्य नाम किम् ?

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

13. **अधोलिखितेषु प्रश्नेषु केषाञ्चित् पञ्चानाम् उत्तरं 50-60 शब्दैः उत्तरत-** $3 \times 5 = 15$

अ. वीरवरस्य त्यागविषये संस्कृतगिरा वर्णयत ।

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

आ. शिवसङ्कल्पसूक्तस्य कः ऋषिः, का देवता, किं छन्दश्च ?

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

इ. अर्थो हि कन्या.......इवान्तरात्मा । श्लोकं पूरयित्वा भावं विशदयत ।

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---

---

---

ई. सांमनस्यसूक्तस्य कः ऋषिः, का देवता, किं छन्दश्च ?

---

---

---

---

---

---

---

---

---

---

उ. मन्दाक्रान्तावृत्तस्य सोदाहरणं लक्षणं लिखत् ।

---

---

---

---

---

---

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

ऊ. सांख्यदर्शनस्य सृष्टिप्रक्रियाविषयं श्लोकमाध्यमेन स्पष्टयत ।

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

**14. अधोलिखितेषु प्रश्नेषु प्रश्नद्वयं 120-150 शब्दैः उत्तरत-** $5 \times 2 = 10$

अ. वीरवरस्य राजभक्तिविषये संस्कृतगिरा विशदयत ।

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

---------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

आ. वेदान्तदर्शनस्य मोक्षविषयं संस्कृतभाषया लिखत ।

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

इ. अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य कथासारांशं सरलसंस्कृतभाषया स्वकीयैः वाक्यैः विशदयत ।